**SET NO – 01**

**Roll No.** | | | | | | | |

Candidates must write the Set No. on the title page of the answer book.

# SAHODAYA PRE-BOARD EXAMINATION, 2021-22

- Check that this question paper contains **7** printed pages.
- Set number given on the right hand side of the question paper should be written on the title page of the answer book by the candidate.
- Check that this question paper contains **9** questions.
- Write down the Serial Number of the question in the left side of the margin before attempting it.
- 20 minutes cooling time has been allotted to read this question paper only and do not write any answer on the answer book during this period.

## CLASS- X

## SUB : SANSKRIT (Code No. 122)

**Time : 2 Hours** **Maximum Marks : 40**

**समयः - होराद्वयम्** **सम्पूर्णाङ्काः - 40**

**सामान्यनिर्देशाः -**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 7 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 9 प्रश्ना: सन्ति।
3. अस्य प्रश्नपत्रस्य पठनाय 20 निमेषा: निर्धारिता: सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम् ।
4. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्क: अवश्यं लेखनीय: ।
5. प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् एव लेखनीया।
6. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
7. प्रश्नानां निर्देशा: ध्यानेन अवश्यं पठनीया:।

## वर्णनात्मकाः प्रश्नाः

| | | | |
|---|---|---|---|
| | | **अपठितावबोधनम्** | |
| **1.** | | **अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>शिक्षा मानव-विकासस्य परमं साधनम् । शिक्षा ज्ञानोदयेन नैतिकं चारित्रिकं च विकासं सम्पादयति । शिक्षा सांस्कृतिकीं दृष्टिम् उद्बोधयति । वर्तमान-शिक्षापद्धतौ बालकस्य सर्वाङ्गीण-विकासस्य परिकल्पना अस्ति । अधुना बालाः आधुनिक विषयान् अपि अध्येतुं सम्प्रेरिताः दृश्यन्ते । यथा हि विज्ञानम्, गणितम्, भूगोलम्, इतिहासम्, अर्थशास्त्रम्, सङ्गीतम् सङ्गणकयन्त्रम् आदयः । वर्तमान-शिक्षापद्धतौ शिक्षिताः युवकाः युवत्यश्च कठिनं श्रमं कृत्वा स्व-स्व क्षेत्रे महत्वपूर्णं साफल्यं प्राप्नुवन्ति। अतएव शिक्षा श्रमस्य महत्त्वमपि शिक्षयति । शिक्षिताः युवकाः मानवीयगुणान् प्रति आकर्षिताः भवन्ति । अस्माकं देशे शिक्षा प्राप्त्यै कोऽपि बालः काऽपि बाला वा अर्थाभावं न अनुभवेत् इति शासनं प्रयतेत । यतः शिक्षा न केवलं मानवकल्याणाय अपेक्षिता अपितु सा राष्ट्रगौरवाय अपि महत्त्वपूर्णा । | 10 |
| | अ. | **एकपदेन उत्तरत -(केवलं प्रश्नद्वयम्)** | 1x2=2 |
| | | (i) शिक्षा कस्य महत्त्वं शिक्षयति ?<br>(ii) मानव-विकासस्य परमं साधनं किम् ?<br>(iii) आधुनिक विषयान् अपि अध्येतुं काः सम्प्रेरिताः दृश्यन्ते ? | |
| | आ. | **पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) शिक्षा कीदृशं विकासं सम्पादयति ?<br>(ii) अस्माकं देशे शासनं किं प्रयतेत ?<br>(iii) शिक्षा किमर्थम् अपेक्षिता ? | 2x2=4 |
| | इ. | **अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत-** | 1 |
| | ई. | **यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)**<br>(i) 'अस्ति' इति क्रियापदस्य कर्तृपदं किम् ?<br>(ii) 'शिक्षिताः' इति विशेषणपदस्य विशेष्यपदं किं प्रयुक्तम् ?<br>(iii) 'सा राष्ट्रगौरवाय अपि महत्त्वपूर्णा' इति वाक्ये 'सा' इति सर्वनामपदं कस्यै प्रयुक्तम् ?<br>(iv) अत्र 'बालः' इत्यस्य पदस्य किं विलोमपदं प्रयुक्तम् ? | 1x3=3 |

| रचनात्मकं कार्यम् | | |
|---|---|---|
| **2.** | **धर्मेन्द्रकुमारः अम्बालानगरतः पूज्यं पितरं पत्रं लिखति यत् सः मासिकं व्ययं कुशलतया करोति । अतः इहमासे धनं न प्रेषणीयम् । इदं पत्रं मञ्जूषायाः उचितानि पदानि चित्वा सम्पूरयतु भवान् ।**<br>(i)................<br>दिनाङ्कः.................<br>पूजनीयाः(ii)..............!<br>सादरं प्रणामम् ।<br>उभयत्र कुशलं (iii)...................विधाता । अधिगतं श्रीमतां पत्रम् । इहमासे मम कृते किमपि (iv).............धनं न प्रेषणीयम् । अस्मिन् मासे मया स्वयमेव किञ्चित् कार्यं कृत्वा (v).......... कृतम् । धनस्य जीवने महती उपयोगिता वर्तते । सर्वेगुणाः धनाश्रिताः । निर्धनस्य न कोऽपि मित्रं भवति । यस्य समीपे धनं, तस्य सर्वे आदरं कुर्वन्ति । (vi)............. तु अभिशापः अस्ति । धर्मार्थकाममोक्षेषु धनस्य (vii).............वर्तते । अतः अहं स्वमासिकव्ययम् अतिकुशलतया करोमि, धनस्य (viii)........... स्वस्य एव हानिः विद्यते । किमधिकम्, मातृचरणेषु सादरं प्रणामाः । अन्येभ्यः (ix)............सन्तु । पत्रोत्तरं शीघ्रं देयम् ।<br>भवतः आत्मजः<br>(x)...............<br><br>**मञ्जूषा**<br><br>धनोपार्जनं, मङ्गलकामनाः, मासिकं, अम्बालानगरतः, निर्धनता, पितृपादाः, अपव्ययेन, वितनोतु, प्राधान्यं, धर्मेन्द्रकुमारः | ½x10=5 |

| | | |
|---|---|---|
| **3.** | **अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशव्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत-** | 1x5=5 |
| | <br>**मञ्जूषा**<br>ग्रामम्, जनाः, इतस्ततः, महिलाः, पुरुषाः, अजः, घासं, चरति, कूपं, जलं नयन्ति, गृहाणि, वृक्षाः, सर्वत्र, हरीतिमा, कार्यालयं, वालिका, भ्रमति, मार्गः, प्रातकालः, ग्रामिणः | |
| | **अथवा**<br>**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चसंस्कृतवाक्येषु एकम् अनुच्छेदं लिखत –**<br>**'प्रातः कालस्य शोभा'**<br>**मञ्जूषा**<br>सूर्योदयः, मार्गेषु, उपवनेषु, जनाः, बालाः, पक्षिणः, पशवः, प्रसन्नाः, भ्रमन्ति, क्रीड़न्ति, कालः, मनोहरः, कूजन्ति, गच्छन्ति, विद्यालयं, सन्ति, यत्र-तत्र, सर्वत्र, अस्ति, विहरन्ति | |
| **4.** | **अधोलिखितवाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत-**<br>**(केवलं वाक्यपञ्चकम्)** | 1x5=5 |
| | (i) ज्ञान के विना जीवन व्यर्थ है ।<br>Life is meaningless without knowledge.<br>(ii) श्रमिक ने कठिन परिश्रम किया ।<br>The labourer worked hard.<br>(iii) तुम दीर्घायु बनो ।<br>You live long.<br>(iv) कल विद्यालय में अवकाश रहेगा ।<br>Tomorrow the school will remain closed. | |

| | | | |
|---|---|---|---|
| | (v) हमें हमेशा सच बोलना चाहिए ।<br>We should always speak truth.<br>(vi) श्री रामचन्द्र दशरथ के पुत्र थे ।<br>Shree Ramachandra was the son of Dasharatha.<br>(vii) हमारे देश की संस्कृति सर्वप्राचीन है ।<br>The culture of our country is most ancient. | | |
| | **पठितावबोधनम्** | | |
| **5.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत-**<br>आदेशं प्राप्य उभौ प्राचलताम्। तत्रोपेत्य काष्ठपटले निहितं पटाच्छादितं देहं स्कन्धेन वहन्तौ न्यायाधिकरणं प्रति प्रस्थितौ। आरक्षी सुपुष्टदेहः आसीत्, अभियुक्तश्च अतीव कृशकायः। भारवतः शवस्य स्कन्धेन वहनं तत्कृते दुष्करम् आसीत्। स भारवेदनया क्रन्दति स्म। तस्य क्रन्दनं निशम्य मुदित आरक्षी तमुवाच –" रे दुष्ट! तस्मिन् दिने त्वयाऽहं चोरिताया मञ्जूषाया ग्रहणाद् वारितः। इदानीं निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे " इति प्रोच्य उच्चैः अहसत्। यथाकथञ्चिद् उभौ शवमानीय एकस्मिन् चत्वरे स्थापितवन्तौ। | | 3 |
| | **अ.** | **एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(क) आरक्षी कीदृशः आसीत्?<br>(ख)कः अतीव कृशकायः?<br>(ग)किं प्राप्य उभौ प्राचलताम्? | ½x2=1 |
| | **आ.** | **पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(क)अभियुक्तस्य क्रन्दनं निशम्य आरक्षी किमुक्तवान्?<br>(ख)उभौ शवमानीय कुत्र स्थापितवन्तौ?<br>(ग)उभौ किं नीत्वा न्यायाधिकरणं प्रति प्रस्थितौ? | 1x2=2 |
| **6.** | **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -**<br>**त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत् ।**<br>**परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः ।।** | | 3 |
| | **अ.** | **एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(क) मूर्खः मनुष्यः कीदृशीं वाचं त्यजति?<br>(ख) मूर्खः मनुष्यः कीदृशं फलं त्यजति?<br>(ग) विदुषां वाक् कीदृशी भवेत्? | ½x2=1 |

| | | | |
|---|---|---|---|
| | आ. | **पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(क) कः धर्मप्रदां वाणीं न वदति ?<br>(ख) अपक्वं फलं कः खादति ?<br>(ग) परुषां वाचं कः वदति ? | 1x2=2 |
| **7.** | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत-**<br>(एतस्मिन्नेव काले व्याघ्रचित्रकौ अपि नदीजलं पातुमागतौ एतं विवादं शृणुतः वदतः च)<br>**व्याघ्रचित्रकौ –** अरे किं वनराजपदाय सुपात्रं चीयते ? एतदर्थं तु आवामेव योग्यौ । यस्य कस्यापि चयनं कुर्वन्तु सर्वसम्मत्या ।<br>**सिंहः –** तूष्णीं भव भोः । युवामपि मत्सदृशौ भक्षकौ न तु रक्षकौ । एते वन्यजीवाः भक्षकं रक्षकपदयोग्यं न मन्यन्ते अतएव विचारविमर्शः प्रचलति ।<br>**बकः –** सर्वथा सम्यगुक्तं सिंहमहोदयेन । वस्तुतः एव सिंहेन बहुकालपर्यन्तं शासनं कृतं परमधुना तु कोऽपि पक्षी एव राजेति निश्चेतव्यम् अत्र तु संशीतिलेशस्यापि अवकाशः एव नास्ति ।<br>**सर्वे पक्षिणः** -(उच्चैः)- आम् आम् – कश्चित् खगः एव वनराजः भविष्यति इति । | | 3 |
| | अ. | **एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(क) कौ सिंहसदृशौ भक्षकौ स्तः ?<br>(ख) केन बहुकालपर्यन्तं शासनं कृतम् ?<br>(ग) व्याघ्रचित्रकौ किं पातुम् आगतौ ? | ½x2=1 |
| | आ. | **पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(क) सिंहः व्याघ्रचित्रकौ किं कथयति ?<br>(ख) बकस्य अनुसारेण कः 'राजा' इति निश्चेतव्यम् ?<br>(ग) सिंहमहोदयेन सर्वथा किम् उक्तम् ? | 1x2=2 |
| **8.** | **मञ्जूषायाः सहायतया अधोलिखितश्लोकस्य अन्वयं पूरयत-**<br>आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।<br>नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ।।<br>**अन्वयः-** (i) मनुष्याणां शरीरस्थः...... शत्रुः (ii)......। उद्यमसमः (iii)...... न अस्ति यं कृत्वा मनुष्यः न (iv)........... । | | ½x4=2 |

| | | |
|---|---|---|
| | **मञ्जूषा**<br>बन्धुः, आलस्यम्, अवसीदति, महान्<br><br>**अथवा**<br>**मञ्जूषायाः सहायतया अधोलिखितश्लोकस्य भावार्थं पूरयत -**<br>विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्त्तिताः।<br>अन्येषां वदने ये तु ते चक्षुर्नामनी मते ।।<br>**भावार्थः-** अस्य भावोऽस्ति यत् विद्या एव नरस्य (i) …….. अस्ति। जनाः अनया विद्यया एव संसारे सर्वविधं व्यवहारं कर्तुं समर्थाः भवन्ति। अतः अस्मिन् संसारे केवलं (ii) …….. ज्ञानिनः विचारशीलाः एव (iii) …….. कथिताः। अन्येषां विद्यारहितानाम् (iv) …….. तु ये चक्षुषी भवतः ते तु नाममात्रे एव। अतः अस्माभिः सर्वथा विद्याप्राप्त्यर्थम् एव प्रयतनीयम्।<br>**मञ्जूषा**<br>आनने, विद्वांसः, नेत्रम्, नेत्रवन्तः | ½x4=2 |
| **9.** | **अधोलिखितानि वाक्यानि घटनाक्रमानुसारं संयोज्य पुनः लिखत-**<br>(i) क्रुद्धः सिंहः इतस्ततः धावति, गर्जति परं किमपि कर्तुमसमर्थः एव तिष्ठति ।<br>(ii) क्रुद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारूढ़ः ।<br>(iii) वानराः हसन्ति वृक्षोपरि च विविधाः पक्षिणः अपि सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति ।<br>(iv) अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति एवमेव वानराः वारं-वारं सिंहं तुदन्ति ।<br>(v) एकः सिंहः सुखेन विश्राम्यति, तदैव एकः वानरः आगत्य तस्य पुच्छं धुनोति।<br>(vi) वनस्य समीपे एवैका नदी अपि वहति ।<br>(vii) निद्राभङ्गदुःखेन वनराजः सन्नपि तुच्छजीवैः आत्मनः एतादृश्या दुरवस्थया श्रान्तः सर्वजन्तून् दृष्ट्वा पृच्छति ।<br>(viii) किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा ? | ½x8=4 |

◆◆◆